# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| | | |
|---|---|---|
| कक्षा-आचार्य-२ | प्रश्नपत्रम् – ४ | गुणाः – ७० |
| विषयः – वास्तुशास्त्रम् | सत्रम्- ४ (चतुर्थम्) | समयः- ११:३० तः ०२:३० |
| दिनाङ्कः – ३०/०३/२०२० | सन्दर्भग्रन्थः – समराङ्गसूत्रधारः | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ अधोलिखितयोरेकतरस्य व्याख्या कार्या।** ०५

१ भागेन कर्णिका कार्या विस्तृत्या निर्गमेण च।
प्रतिभद्रं च भागार्धनिर्गतं तत्र कल्पयेत्।।

२ आलिन्दः सर्वतोभगनिर्गता भावविस्तृताः।
कदाचित् सार्धभागेन निष्क्रान्ता भागविस्तृता।।

**प्रश्नः २ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** १०

१ मण्डपलक्षणम्

२ भूमिजप्रासादलक्षणम्।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ कस्यचिदेकस्य व्याख्या कार्या।** ०५

१ अथो विभागं नवधा लिङ्गे सर्वमे भावयेत्।
उर्ध्वं भागत्रयं त्यक्त्वा भागभागेन कल्पयेत्।।

२ प्रविभागस्य देवानां रेखाणां चापि लक्षणम्।
लक्षणं पञ्चभूतानां तेषामारभ्य एव च।।

**प्रश्नः ४ अधोलिखितयोरेकतरस्योपरि निबन्धं लिखत।** १०

१ लिङ्गपीठप्रतिमालक्षणम्।

२ अण्डकप्रमाणम्।

### तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ कस्यचिदेकस्य व्याख्या कार्या।** ०५

१ लकारावर्तयोर्मध्ये पीयुषी सा प्रकीर्तिता।
अङ्गुलद्वितयायामा विस्तृता सार्थमङ्गुलम्।।

२ नगरेषु सदा कार्यः स्कन्धः परजयैषिभिः।
खेटके तु विधातव्यः षण्मुखो ज्वलनप्रभः।।

**प्रश्नः ६ कस्यचिदेकस्योपरि निबन्धं लिखत।** **१०**

१ प्रासादे दोषगुणनिरूपणम्।

२ ऋज्वागतादि स्थानलक्षणम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ अधोलिखितयोरेकतरस्य व्याख्या कार्या।** **०५**

१ आलीढं स्थानकं कुर्याद् रुद्रश्चात्राधिदैवतम्।
कुञ्चितं दक्षिणं कृत्वा वामपादं प्रसारयेत्।।

२ पताके तु यदा वक्रानामिका त्वङ्गुलिर्भवेत्।
त्रिपताकः स विज्ञेयः कर्मचास्याभिधीयते।।

**प्रश्नः ८ कस्यचिदेकस्योपरि निबन्धं लिखत।** **१०**

१ वैष्णवादिस्थानकलक्षणम्

२ पञ्चपुरुषस्त्रीलक्षणम्।

## पञ्चान्वितिः (Unit 5)

**प्रश्नः ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामुत्तरं लिखत।** **१०**

१ समराङ्गसूत्रधारस्य रचनाकारः कः?

२ चतुरश्रीकृते क्षेत्रे कति विभागेषु विभाजिते?

३ कण्डवृत्तं कति भागविस्तृतं परिकल्पयेत्?

४ एकस्यामङ्गुल्यां कति यवाः भवन्ति?

५ एकस्मिन् हस्ते कति अङ्गुल्याः भवन्ति?

६ ताम्रनिर्मितप्रतिमायाः फलं किम्?

७ एकस्मिन् गोलके अङ्गुलीमानं लिखत।

८ कालमानं कति विधम्?

९ रजतस्य प्रतिमायाः फलं लिखत।

१० सुवर्णस्य प्रतिमायाः फलं किम्?

११ समराङ्गणसूत्रधारे कति संख्यकानां पुरुषाणां वर्णनमस्ति?

१२ प्रतिमानिर्माणे पञ्चपुरुषाणां नामानि लिखत।

१३ चित्रविशारदैः कति रसाणां वर्णनं क्रियते?

१४ प्रतिमायां श्रृंगाररसस्य लक्षणं किदृशं भवति?

१५ प्रतिमायां हास्यरसस्य लक्षणं कथं द्रष्टुं शक्यते?

**************************